यदिक्कृतपानीयपात्रो दक्षिणावर्त्तेन चतुष्कोणमण्डलं कृत्वा लोहताम्रस्वर्णरूप्यभवादिदुष्टभस्मकांस्यकदल्यादिपत्रपृष्ठपद्मपलाशपत्रेतरपात्रं विधाय प्रक्षाल्य च आत्मानं पात्रञ्च दक्षिणक्रमेण जलेन वेष्टयित्वा तदुपरि लोहेतरपात्रान्तरेण हस्ताभ्यां प्रतिषिद्धेतरमन्नादिकं स्थापयित्वा अन्नं दृष्ट्वा प्रहृष्येत्। अस्माकं नित्यमेवास्तु इत्यभिलप्य संप्रोक्ष्य आचाराच्चतुष्कोणमण्डलाभ्यन्तरे जललिखितचक्रोपरि ॐ नारायणाय नम इत्यन्नं सजलं मध्ये दद्यात्। तत्पार्श्वे ॐ भुवः पतये स्वाहा ॐ भुवनपतये स्वाहा ॐ भूतानां पतये स्वाहा। इति बलिचतुष्टयं दद्यात्। तदिदं सोपकरणमन्नं ॐ विष्णवे नम इत्युत्सृज्य तदग्रं किञ्चित् ॐ विष्वक्सेनाय नम इति दत्त्वा अन्नोपरि विष्णुनिर्म्माल्यतुलसीपत्रं प्रक्षिप्य विष्णुपादोदकं पुरा न गृहीतञ्चेदिदानीम्।

"ॐ कृष्ण कृष्ण महाबाहो भक्तानामार्त्तिनाशन ! ।
सर्व्वपापप्रशमनं पादोदकं प्रयच्छ मे ॥"

इति गृहीत्वा इष्टदेवतानामपरेरितं श्रुत्वा स्वयं चिरणार्थं वा ॐ अमृतोपस्तरणमसि स्वाहा इत्यनेन पीत्वा।

"ॐ अकालमृत्युहरणं सर्व्वव्याधिविनाशनम्।
विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहम् ॥"

इत्यनेन पादोदकशेषं शिरसि दद्यात्।

"ॐ उच्छिष्टभोजिनस्तस्य वयमुच्छिष्टकाङ्क्षिणः।
येन लीलावराहेण हिरण्याक्षो निपातितः ॥"

इत्युक्त्वा अङ्गुष्ठानामिकाभ्यां घृतप्लुतस्तोकमन्नमादाय महामौनी साङ्गुष्ठसर्व्वाङ्गुलिभिर्व्वा ॐ प्राणाय स्वाहा इत्यनेन मुखे दत्त्वा अदन्तच्छिन्नं निगिरेत्। एवं ॐ अपानाय स्वाहा ॐ समानाय स्वाहा ॐ उदानाय स्वाहा ॐ व्यानाय स्वाहा। ततो वीर्य्यकामो मौनी भुञ्जीत। ततः प्रथमं द्रवयुक्तमधुरं मध्ये कठिनाम्ललवणानि अन्ते द्रवयुक्तकटुतिक्तानि यथालाभं क्षीरान्तं साङ्गुष्ठैश्चकरसर्व्वाङ्गुलिभिः अनतिल्पं भुञ्जीत। पश्चादधिकं जलादिकं न पातव्यम्। जलक्षीरदधिघृतमधुशाकशक्तुमांसेतरद्रव्याणां शेषं रक्षणीयम्। भोजने संपूर्णे तु मांसभोजने करं प्रक्षाल्य तद्भोजने तु करमप्रक्षाल्यैव सान्नेन हस्तेन जलं गृहीत्वा ॐ अमृतापिधानमसि स्वाहा इति जलगण्डूषं गृहीत्वा सान्नं तज्जलशेषं ॐ रौरवेऽपुण्यनिलये पद्मार्व्वुदनिवासिनाम्। उच्छिष्टभागिनामन्नमक्षय्यमुपतिष्ठतामिति भूमौ निक्षिपेत्। भोजनकाले तु विड़ालकर्म्मकस्पर्शत्यागः। विड़ालकर्न्नकस्पर्शे न दोषः। ततः स्थानान्तरं न गच्छेत्। परावृत्य मृद्भिर्म्मुखहस्तलेपमपनीय तृणादिना जिह्वाघर्षणयोग्यं दन्तेभ्यो गृहीतरसद्रव्यं रक्तपातक्षतादिकं विना अपनयेत्। यत्ने कृते यदि न निःसरति तदा न दोषः।

ततो जिह्वाञ्च संघृष्य जलगण्डूषैर्म्मुखाभ्यन्तरं संशोध्य पाणी पादौ च प्रक्षाल्य आसनस्थ एव भूमौ पादौ दत्त्वा द्विराचम्य मुखं तुलसीपत्रादिना संशोध्य दक्षिणपादाङ्गुष्ठे दक्षिणहस्तेन—

"ॐ अङ्गुष्ठमात्रपुरुषो ह्यङ्गुष्ठञ्च समाश्रितः।
ईशः सर्व्वस्य जगतः प्रभुः प्रीणातु विश्वभुक् ॥"

इति मन्त्रेण जलं दद्यात्। ततो महीमार्ज्जनाभावे अशुचित्वादविलम्बमेव भोजनपात्रमुद्धृत्य तत् स्थानं उच्छिष्टमपनीय गोमयोदकाभ्यां संमृज्य सिञ्चेत्। सुस्थः प्रशान्तचित्त आसने उपविश्याभीष्टदेवतानाम स्मृत्वा—

"ॐ अग्निराप्याययत्वन्नं पार्थिवं पवनेरितः।
दत्तावकाशो नभसा जरयत्वस्तु मे सुखम् ॥
अन्नं बलाय मे भूमेरपामग्न्यनिलस्य च।
भवत्वेतत्परिणतौ ममास्त्वव्याहतं सुखम् ॥
प्राणापानसमानानामुदानव्यानयोस्तथा।
अन्नं तुष्टिकरञ्चास्तु ममास्त्वव्याहतं सुखम् ॥
अगस्तिरग्निर्व्वड़वानलश्च
भुक्तं ममान्नं जरयत्वशेषम्।
सुखं ममैतत्परिणामसम्भवं
यच्छत्वरोगं मम चास्तु देहे ॥
विष्णुः समस्तेन्द्रियदेहदेहि-
प्रधानभूतो भगवान् यथैकः।
सत्येन तेनान्नमशेषमेत-
दारोग्यदं मे परिणाममेतु ॥
विष्णुरत्ता तथैवान्नं परिणामश्च वै यथा।
सत्येन तेन मद्भुक्तं जीर्य्यत्वन्नमिदं तथा ॥"

इत्युच्चार्य्य वामहस्तेनोदरं परिमृजेत्। ततः पादशतव्रजनानन्तरं वामपार्श्वेन किञ्चित्कालं शयितव्यम्। ततस्ताम्बूलादि सुखवासद्रव्यं भोक्तव्यम्। इत्याह्निकाचारे पञ्चमयामार्द्धकृत्यम् ॥ * ॥ अथ भोजनादिदानफलम्।

"भोजनाच्छादनं दत्त्वा दत्त्वा चोपानहौ द्विज ! ।
स स्वर्गलोकं संभुज्य सर्व्वकामोऽत्र जायते ॥
विद्यां भक्त्या प्रयच्छेद्यः परंब्रह्मण्यसौ विशेत्।
विद्यार्थिने च विप्राय यो दद्याद्भोजनं नरः ॥
अन्नं प्राणो जलं प्राणः प्राणश्चौषधमुच्यते।
तस्मादौषधदानेन दत्ताः स्युरसवो द्विजाः ॥"

इति पराशरस्मृतिः ॥

भोजने प्रतिषेधो यथा,—

"ताम्रपात्रे पयःपानमुच्छिष्टे घृतभोजनम्।
दुग्धे च लवणं दद्यात् सद्यो गोमांसभक्षणम् ॥
यः शूद्रेण समाहूतो भोजनं कुरुते द्विजः।
सुरापश्च स विज्ञेयः सर्व्वधर्म्मबहिष्कृतः ॥
स्नानं रजकतीर्थेषु भोजनं गणिकालये।
शयनं पूर्व्वपादे च ब्रह्महत्या दिने दिने ॥"

इति कर्म्मलोचनम् ॥

अथ शिशूनां प्रथमान्नभोजनदिनादि। यथा, यमः।

"ततोऽन्नप्राशनं मासि षष्ठे कार्य्यं यथाविधि।
अष्टमे वाथ कर्त्तव्यं यद्वेष्टं मङ्गलं कुले ॥"

षष्ठ इति मुख्यः कल्पः प्रागुक्तन्यायात्। कृत्यचिन्तामणौ।

"अन्नस्य प्राशनं प्रोक्तं मासि षष्ठेऽष्टमे बुधैः।
स्त्रीणान्तु पञ्चमे मासि सप्तमे प्रजगौ मुनिः ॥
द्वादशीसप्तमीनन्दारिक्तासु पञ्चपर्व्वसु।
बलमायुर्यशो हन्यात् शिशूनामन्नभोजनम् ॥"

भुजबलभीमे।

"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वै तिथौ
सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च कृष्णेतरे।
प्राजेशादितिपौष्णवैष्णवयुगैर्हस्तादिषट्कोत्तरै-
राग्नेयाप्यतिपित्रभैश्च नितरामन्नादिभक्षं शुभम् ॥"

युगैरिति प्राजेशादौ प्रत्येकं सम्बध्यते अत्रापि तिथ्यङ्गादिविद्धञ्च विवर्जयेत्।

"वृषद्वन्द्वधनुर्मीनकन्यालग्नेऽन्नभक्षणम्।
त्रिकोणाष्टकयुक्तान्त्यग्रहा यद्वत्तथा फलम् ॥
दुष्टः शशधरो लग्नात् षष्ठाष्टस्थोऽन्नभक्षणे ॥"

मार्कण्डेयपुराणम्।

"देवतापुरतस्तस्य पितुरङ्कगतस्य च।
अलङ्कृतस्य दातव्यमन्नं पात्रे च काञ्चने ॥
मध्वाज्यकणकोपेतं प्राशयेत् पायसन्ततः।
कृतप्राशनमुत्सङ्गे मातुर्बालन्तु तं त्यजेत् ॥
देवाग्रतोऽथ विन्यस्य शिल्पभाण्डानि सर्व्वशः।
शास्त्राणि चैव शस्त्राणि ततः पश्येत्तु लक्षणम् ॥
प्रथमं यत् स्पृशेद्बालः शिल्पभाण्डं स्वयं तथा।
जीविका तस्य बालस्य तेनैव तु भविष्यति ॥"

सोमवारे दोषमाह भोजराजः।

"वाचालो बलवान् दिने दिनपतेरत्यन्तदीप्तानलो
देही हीनहुताशनः शिशिरगौ कौजे रुजा पीड़ितः।
बौधे भोगसुखोदयी प्रथमभुग्जीवे चिरायुः सुखी
शुक्रे सौख्यबलान्वितोऽतिसुभगो मन्दे च मन्दानलः ॥"

इति ज्योतिस्तत्त्वम् ॥

तद्वैदिकपर्य्यायाः। आवयति १ भर्व्वति २ बभस्ति ३ वेति ४ वेवेष्टि ५ अविष्यन् ६ वप्सति ७ भसथः ८ बब्धाम् ९ करति १०। इति दशाशितिकर्म्माणः। इति वेदनिघण्टौ २ अध्यायः ॥

(तथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।

"वक्ष्याम्यतः परं कृत्स्नमाहारस्योपकल्पनाम्।
घृतं कार्ष्णायसे देयं पेया देया तु राजते ॥
फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्वैदलेषु च।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् ॥
प्रद्रवाणि रसांश्चैव राजतेषूपहारयेत्।
कट्वराणि खड़ांश्चैव सर्व्वान् शैलेषु दापयेत् ॥
दद्यात्ताम्रमये पात्रे सुशीतं सुश्रृतं पयः।
पानीयं पानकं मद्यं मृण्मयेषु प्रदापयेत् ॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च।
दद्याद्वैदूर्य्यपात्रेषु रागषाड़वसट्टकान् ॥